
३

# वैद्यवृत्तिश्चतुर्विधा




*(आचार्यः कक्षायां प्रविशति। सर्वे उत्थाय अभिवादनं कुर्वन्ति।)*

**आचार्यः** – अनन्ये! अद्य त्वं किमर्थं निरुत्साहा दृश्यसे?

**अनन्या** – आचार्य! मम स्वास्थ्यं सम्यक् नास्ति।

**आचार्यः** – किमर्थम् अस्वस्थता? स्वास्थ्यस्य विषये विशेषतः अवधानं कर्तव्यं खलु! महाकविकालिदासेन उक्तं वर्तते– 'शरीरमाद्यं खलु धर्मसाधनम्' इति।

**देवांशः** – आचार्य! अस्य वाक्यस्य कोऽभिप्रायः?

**आचार्यः** – यदि धर्माचरणं कर्तुमिच्छन्ति तर्हि शरीरं स्वस्थं भवेत् इति महाकवेः मतम्।

**अनन्या** – आचार्य! स्वास्थ्यस्य रक्षणाय के उपायाः सन्ति?

**आचार्यः** – वत्से! शरीरस्य स्वस्थतायाः विषये आयुर्वेदे यदुक्तं तद् वर्णयामि।

**पूजा** – आचार्य! आयुर्वेदः नाम किम्?

**आचार्यः** – वदामि; सावधानं शृण्वन्तु भवन्तः।

© NCERT not to be republished

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते॥

**मुदिता** – आचार्य! एते विषयाः चिकित्सासम्बद्धाः खलु!

**आचार्यः** – सत्यं वत्से! चिकित्सासम्बद्धाः सर्वेऽपि विषयाः आयुर्वेदे विचार्यन्ते। तत्र चिकित्सायाः चत्वारः अवयवाः उक्ताः सन्ति। तान् शृणुत –


वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः।
एते पादाश्चिकित्सायाः कर्मसाधनहेतवः॥




गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक्।
व्याधिमल्पेन कालेन महान्तमपि साधयेत्॥

**मोहितः** – आचार्य! यदि रोगः एव न भवेत् तदा तु अस्माकं सुखमेव खलु!

**आचार्यः** – सत्यं वत्स! स्वास्थ्यस्य संरक्षणाय आयुर्वेदे बहवः उत्तमाः उपायाः उक्ताः। यथा –






अत्यम्बुपानान्न विपच्यतेऽन्नं
निरम्बुपानाच्च स एव दोषः।
तस्मान्नरो वह्निविवर्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि॥



नित्यं हिताहार–विहारसेवी समीक्ष्यकारी विषयेष्वसक्तः।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः॥

**सुधीरः** – आचार्य ! अहमपि जीवने वैद्यः भवितुम् इच्छामि। कृपया वैद्यस्य कर्तव्यानि बोधयतु।

**आचार्यः** – साधु वत्स ! आयुर्वेदे वैद्यस्य अनेकानि कर्तव्यानि उक्तानि। यथा —



मैत्री कारुण्यमार्त्तेषु शक्ये प्रीतिरुपेक्षणम्।
प्रकृतिस्थेषु भूतेषु वैद्यवृत्तिश्चतुर्विधा ।।

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| प्रविशति (प्र+√विश्) | प्रवेशं करोति | प्रवेश करता है | enters, steps in | |
| निरुत्साहा (बहुव्रीहिः) | निर्गतः उत्साहः यस्याः सा | उत्साह से रहित | unenthusiastic | |
| अस्वस्थता (नञ्-तत्पुरुषः) | न स्वस्थता इति अस्वस्थता | रुग्णता | sickness | |
| अभिप्रायः | तात्पर्यम् | आशय | intention | |
| हितम् | कल्याणकरम् | उपकारक | favourable | |
| अहितम् | अमङ्गलम् | हानिकर | unfavourable | |
| अवयवाः | भागाः | अंश | parts | |
| वैद्यः | चिकित्सकः | चिकित्सक | physician | |
| व्याधिः | रोगः | बीमारी | disease | |
| व्याधि-उपसृष्टः (तत्पुरुषः) | व्याधिना उपसृष्टः | बीमार व्यक्ति | sick person | |
| भेषजम् | औषधम् | दवाई | medicine | |
| परिचारकः | सहायकः | सेवक | attendant | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| गुणवद्भिः (गुणवद्) | गुणाः अस्य सन्ति इति तैः | गुणवान् लोगों से | from virtuous people | |
| साधयेत् (√सिध्, विधिलिङ् प्र.पु.ए.व. | सिद्धं कुर्यात् | ठीक करना चाहिए | should be cured | |
| आजीवनम् | जीवनपर्यंतम् | जीवन भर | throughout life / lifelong | |
| अम्बुः | जलम् | पानी | water | |
| विपच्यते (वि+√पच्, कर्मणि,) | जीर्णं भवति | पचता है | is digested | |
| वह्निः | अग्निः | आग | fire | |
| विवर्धनाय (वि+√वर्ध, ल्यप्) | वर्धनं कर्तुं | बढ़ाने के लिए | to increase | |
| मुहुर्मुहुः (मुहुः+मुहुः, अव्ययपदम्) | असकृत् | बार-बार | repeatedly | |
| अभूरि (नञ्-तत्पुरुषः) | न भूरि इति अभूरि | अल्प मात्रा में | a handful | |
| हिताहारः (कर्मधारयः) | हितकरः आहारः | शरीर के लिए उपयोगी आहार | food that is beneficial for the body | |
| विहारसेवी (बहुव्रीहिः) | विहारं सेवते इति | उचित दिनचर्या का पालक | follower of a proper routine | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| समीक्ष्यकारी | समीक्ष्य इति करोति | जो सोच समझकर कार्य करता है। | a prudent person | |
| विषयेषु | इन्द्रियजन्येषु शब्द-स्पर्शादिविषयेषु, | शब्द स्पर्श इत्यादि इन्द्रियों के विषय में | objects of the senses such as sound, touch, etc. | |
| असक्तः | न सक्तः इति असक्तः | आसक्ति रहित, मोह से मुक्त | free from attachment | |
| समः | सर्वेषु समानभावेन यः पश्यति सः | समान भाव वाला, निष्पक्ष | unbiased | |
| आप्तः | विश्वसनीयः | विश्वसनीय | trustworthy | |
| उपसेवी | सेवकः | सेवा करने वाला, संग करने वाला | one who associates with | |
| कारुण्यम् (ष्यञ्-प्रत्ययः) | करुणायाः भावः | दयाभावः | compassion / mercy | |
| आर्त्तेषु | दुःखितेषु जनेषु | दुःखी लोगों के प्रति | towards the distressed | |
| शक्ये | सामर्थ्ययुक्ते जने | सामर्थ्यवान् व्यक्ति में | in a capable person | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| उपेक्षणम् | औदासीन्यम् | उदासीनता | indifference | |
| प्रकृतिस्थेषु | प्रकृतौ तिष्ठति इति, तेषु | स्वस्थ व्यक्तियों के प्रति | towards healthy people | |
| भूतेषु | प्राणिषु | जीवों में | towards living beings | |
| वृत्तिः | आजीविका | व्यवहार, आचरण, प्रवृत्ति | instinct | |

## अभ्यासाद् जायते सिद्धिः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत—**

(क) धर्मसाधनविषये महाकविना कालिदासेन उक्तं वाक्यं किम्?

(ख) आयुर्वेदे के विषयाः विचार्यन्ते?

(ग) चिकित्सायाः चत्वारः पादाः के?

(घ) गुणवान् भिषक् अल्पेन कालेन किं साधयेत्?

(ङ) अत्यम्बुपानात् कः दोषः सम्भवति?

**२. रिक्तस्थानानि पूरयत—**

(क) ................................ विषये विशेषतो अवधानं कर्तव्यम्।

(ख) आयुर्वेदे चिकित्सायाः ........................... अवयवाः उक्ताः।

(ग) ..................................... अन्नं न विपच्यते।

© NCERT not to be republished

(घ) नरः ........................................ मुहुर्मुहुः अभूरि वारि पिबेत्।

(ङ) चिकित्सकस्य आर्त्तेषु मैत्री ..................................च भवेत्?

### ३. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत—

(क) चिकित्सायाः **चत्वारः** पादाः उक्ताः सन्ति।

(ख) **भिषक्** अल्पेन कालेन महान्तमपि व्याधिं साधयेत्।

(ग) शरीरस्य स्वास्थ्यस्य रक्षणाय **आयुर्वेदे** बहवः उत्तमाः उपायाः उक्ताः।

(घ) अत्यम्बुपानात् **अन्नं** न विपच्यते।

(ङ) **वैद्यानां** चतुर्विधा वृत्तिः भवति।

### ४. रिक्तकोष्ठकेषु उचितानि उपसर्गपदानि पूरयत—

| पदम् | उपसर्गपदम् |
|---|---|
| निरुत्साहा | निर् |
| उपसृष्टः | |
| परिचारकः | |
| अत्यम्बुः | |
| विपच्यते | |
| निरम्बुः | |
| विवर्धनाय | |
| उपेक्षणम् | |

### ५. अनुच्छेदं पठित्वा अधोलिखितानां प्रश्नानाम् उत्तराणि देयानि—

प्राचीनकाले आयुर्वेदाचार्यः आत्रेयः स्वशिष्याणां परीक्षार्थं तान् वनात् तादृशं कमपि वनस्पतिम् आनेतुम् आदिष्टवान्, यस्य किमपि औषधीयमहत्त्वं न स्यात्। सर्वे शिष्याः यं कमपि वनस्पतिम् अनुपयुक्तं मत्वा आनीतवन्तः, किन्तु अन्ते तस्य प्रियशिष्यः जीवितरामः रिक्तहस्तः प्रत्यागतवान्। गुरुणा पृष्टे सति



© NCERT not to be republished

'अहं सम्पूर्णप्रकृतौ तादृशं कमपि वनस्पतिं न प्राप्तवान्, यस्मिन् औषधीयगुणः न स्यात्' इति खिन्नः भूत्वा जीवितरामः अवदत्। तस्य एतद् वचनं श्रुत्वा गुरुः अतीव प्रसन्नः अभवत्, तं च परीक्षायां सफलं घोषितवान्। कथानकस्य सारः अस्ति यत् प्रत्येकमपि वनस्पतौ कोऽपि औषधीयगुणः अवश्यमेव वर्तते।

(क) आत्रेयः कीदृशं वनस्पतिम् आनेतुं शिष्यान् प्रेषितवान्?

(ख) प्रियशिष्यः जीवितरामः कथं प्रत्यागतवान्?

(ग) खिन्नः जीवितरामः किम् अवदत्?

(घ) जीवितरामस्य वचनं श्रुत्वा गुरुः किं कृतवान्?

(ङ) अस्य कथानकस्य सारः कः?

## स्वाध्यायान्मा प्रमदः

**हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।**
**मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते।।**

(*चरकसंहिता*,सूत्रस्थानम् 1/41)

**पदच्छेदः** – हित–अहितम् सुखम् दुःखम् आयुः तस्य हित–अहितम् मानम् च तत् च यत्र उक्तम् आयुर्वेदः सः उच्यते

**अन्वयः** – यत्र हित–अहितं सुखं दुःखम् आयुः तस्य (आयुषः) हिताहितं मानं च उक्तम् (अस्ति) सः आयुर्वेदः उच्यते।

**भावार्थः** – आयुर्वेदः एतादृशं विज्ञानम् अस्ति यत्र शरीराय हितकरम् अहितकरम्, सुखं, दुःखम्, आयुः, आयुषः वर्धनार्थं हितकराणाम् अहितकराणां च विषयाणां विवेचनम्, आयुषः अवधिः, लक्षणानि च वर्णितानि सन्ति।

**वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः।**
**एते पादाश्चिकित्सायाः कर्मसाधनहेतवः।।**

**गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक्।**
**व्याधिमल्पेन कालेन महान्तमपि साधयेत्।।**

(*सुश्रुतसंहिता*, 34/15,16)



© NCERT not to be republished

**पदच्छेदः** – वैद्यः व्याधि–उपसृष्टः च भेषजम् परिचारकः एते पादाः चिकित्सायाः कर्म–साधन–हेतवः गुणवद्भिः त्रिभिः पादैः चतुर्थः गुणवान् भिषक् व्याधिम् अल्पेन कालेन महान्तम् अपि साधयेत्

**अन्वयः** – वैद्यः व्याधि–उपसृष्टः भेषजं परिचारकः च एते चिकित्सायाः कर्मसाधन–हेतवः (चत्वारः) पादाः (सन्ति)। त्रिभिः गुणवद्भिः पादैः चतुर्थः (पादः) गुणवान् भिषक् महान्तं व्याधिम् अपि अल्पेन कालेन साधयेत्।

**भावार्थः** – आचार्यः सुश्रुतः कथयति चिकित्सायाः चत्वारः पादाः अर्थात् अवयवाः भवन्ति इति, यथा – वैद्यः रोगी औषधं परिचारकः च। यः वैद्यः (भिषक्) गुणवान् भवति सः अन्यैः त्रिभिः गुणयुक्तपादैः अर्थात् रोगिणः औषधस्य सेवकस्य च साहाय्येन अल्पेन एव कालेन चिकित्सां कृत्वा कठिनस्य अपि रोगस्य प्रशमनं कर्तुं शक्नोति।

**अत्यम्बुपानान्न विपच्यतेऽन्नं निरम्बुपानाच्च स एव दोषः।**
**तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि॥**

(*वैद्यकीयसुभाषितम्* 10/20)

**पदच्छेदः** – अति–अम्बु–पानात् न विपच्यते अन्नम् निरम्बु–पानात् च सः एव दोषः तस्मात् नरः वह्नि–विवर्धनाय मुहुः मुहुः वारि पिबेत् अभूरि

**अन्वयः** – अन्नम् अत्यम्बुपानात् न विपच्यते निरम्बुपानात् च सः एव दोषः (भवति) तस्मात् नरः वह्नि–विवर्धनाय मुहुर्मुहुः अभूरि वारि पिबेत्।

**भावार्थः** – अन्नग्रहणकाले अधिकमात्रया जलस्य पानेन भुक्तम् अन्नं जीर्णं न भवति, एवमेव जलं किञ्चिदपि न पीयते चेत् अपि अजीर्णता भवति। अतः उदरस्य पाचकाग्नेः (जठराग्नेः) वर्धनाय अल्पमात्रया वारं वारं जलं पातव्यम्।

**नित्यं हिताहार–विहारसेवी समीक्ष्यकारी विषयेष्वसक्तः।**
**दाता समः सत्यपरः क्षमावान् आप्तोपसेवी च भवत्यरोगः॥**

(*अष्टाङ्गहृदयम्*, 4.36)

**पदच्छेदः** – नित्यम् हित–आहार–विहार–सेवी समीक्ष्यकारी विषयेषु असक्तः दाता समः सत्यपरः क्षमावान् आप्त–उपसेवी च भवति अरोगः

**अन्वयः** – (यः मनुजः) नित्यं हिताहारविहारसेवी, समीक्ष्यकारी, विषयेषु असक्तः, दाता, समः, सत्यपरः, क्षमावान्, अप्तोपसेवी च (भवति) सः अरोगः (भवेत्)।



© NCERT not to be republished

**भावार्थः** – यः जनः प्रतिदिनं शरीराय हितकरम् आहारं सेवते। उत्तमां दिनचर्यां पालयति। विवेकपूर्वकं कार्यं करोति। विषयेषु यस्य आसक्तिः नास्ति। यः दानशीलः, सर्वेषु प्राणिषु समानव्यवहारशीलः, सत्यवक्ता, क्षमावान्, श्रेष्ठजनानां गुर्वादीनां च सेवायां निरतः सः रोगरहितः एव भवति।

**मैत्री कारुण्यमार्त्तेषु शक्ये प्रीतिरुपेक्षणम्।**
**प्रकृतिस्थेषु भूतेषु वैद्यवृत्तिश्चतुर्विधा॥**

(*चरकसंहिता*, सूत्रस्थानम्. 9/26)

**पदच्छेदः** – मैत्री कारुण्यम् आर्त्तेषु शक्ये प्रीतिः उपेक्षणम् प्रकृतिस्थेषु भूतेषु वैद्यवृत्तिः चतुर्विधा

**अन्वयः** – (वैद्यस्य) आर्त्तेषु मैत्री कारुण्यं च (भवेत्), शक्ये प्रीतिः (स्यात्), प्रकृतिस्थेषु भूतेषु उपेक्षणं च (भवेत् इत्येवं) चतुर्विधा वैद्यवृत्तिः (भवति)।

**भावार्थः** – वैद्यस्य सर्वेषु रोगिषु मैत्री दयाभावः च भवेत्। येषां रोगिणां रोगनिवारणस्य सम्भावना अधिका अस्ति तत्र वैद्यः अधिकम् अवधानं दद्यात्। असाध्यरोगेण पीडितेषु वैद्यः विरक्तभावं स्थापयेत्। इत्येवं प्रकारेण वैद्यानां चतुर्विधा वृत्तिः भवति।



## यस्तु क्रियावान् मनुजः स विद्वान्

१. अन्तर्जालस्य साहाय्येन केषाञ्चिद् पञ्च आयुर्वेदाचार्याणां नामानि, तैः रचितग्रन्थानां नामानि च बृहत्स्फोरकपत्रे विलिख्य कक्षायां प्रदर्शयत।

२. परिजनानां शिक्षकाणां च साहाय्येन केषाञ्चित् दशरोगाणां निदानार्थं केषाम् आयुर्वेदौषधीनां प्रयोगः भवति इति सूचीं कृत्वा स्वकक्षायां प्रदर्शयत।

३. शिक्षकः कक्षायां गणद्वयं कारयित्वा क्रमशः आरोग्यार्थम् उपयोगिनां सिद्धान्तानां चर्चां प्रवर्तयति।

© NCERT not to be republished

- आदौ प्रथमगणस्य कश्चन छात्रः चर्चायाः आरम्भं करोति। द्वितीयगणात् छात्राः क्रमशः उत्तररूपेण वाक्यानि कथयन्ति। पुनः द्वितीयगणात् कश्चन छात्रः प्रश्नं करोति। प्रथमगणस्य छात्राः उत्तरं यच्छन्ति। एवमेव चर्चा अग्रे प्रवर्तते। यथा —

| प्रथमगणः | द्वितीयगणः |
|---|---|
| छात्रः – शरीरं स्वस्थं भवति चेत् के के लाभाः भवन्ति? | छात्रः (1) – आनन्देन क्रीडितुं शक्नुमः।<br>छात्रः (2) – सम्यक्तया कार्यं कर्तुं शक्नुमः।<br>छात्रः (3) – भ्रमणं कर्तुं शक्नुमः। |
| छात्रः (1) ....................................।<br>छात्रः (2) ....................................।<br>छात्रः (3) ....................................। | छात्रः – उपचारे वैद्यस्य सहायकाः के? |
| छात्रः – कश्चित् रुग्णः भवति चेत् सर्वादौ किं कर्तव्यम्? | छात्रः (1) ....................................।<br>छात्रः (2) ....................................।<br>छात्रः (3) ....................................। |

© NCERT not to be republished